श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तनवतितमः सर्गः ॥

## सुग्रीवेण महोदरस्य वधः

हन्यमाने बले तूर्णमन्योन्यं ते महामृधे।
सरसीव महाघर्मे सूपक्षीणे बभूवतुः ॥ 6.97.1 ॥

स्वबलस्य तु घातेन विरूपाक्षवधेन च।
बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥ 6.97.2 ॥

प्रक्षीणं स्वबलं दृष्ट्वा वध्यमानं वलीमुखैः।
बभूवास्य व्यथा युद्धे दृष्ट्वा दैवविपर्ययम् ॥ 6.97.3 ॥

उवाच च समीपस्थं महोदरमनन्तरम्।
अस्मिन् काले महाबाहो जयाशा त्वयि मे स्थिता ॥ 6.97.4 ॥

जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमम्।
भर्तृपिण्डस्य कालोऽयं निर्वेष्टुं साधु युध्यताम् ॥ 6.97.5 ॥

एवमुक्तस्तथेत्युक्त्वा राक्षसेन्द्रो महोदरः।
प्रविवेशारिसेनां स पतङ्ग इव पावकम् ॥ 6.97.6 ॥

ततः स कदनं चक्रे वानराणां महाबलः।
भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः ॥ 6.97.7 ॥

वानराश्च महासत्त्वाः प्रगृह्य विपुलाः शिलाः।
प्रविश्यारिबलं भीमं जघ्नुस्ते सर्वराक्षसान्॥ **6.97.8** ॥

महोदरः सुसङ्क्रुद्धः शरैः काञ्चनभूषणैः।
चिच्छेद पाणिपादोरु वानराणां महाहवे॥ **6.97.9** ॥

ततस्ते वानराः सर्वे राक्षसैरर्दिता भृशम्।
दिशो दश द्रुताः केचित् केचित् सुग्रीवमाश्रिताः॥ **6.97.10** ॥

प्रभग्नं समरे दृष्ट्वा वानराणां महाबलम्।
अभिदुद्राव सुग्रीवो महोदरमनन्तरम्॥ **6.97.11** ॥

प्रगृह्य विपुलां घोरां महीधरसमां शिलाम्।
चिक्षेप च महातेजास्तद्वधाय हरीश्वरः॥ **6.97.12** ॥

तामापतन्तीं सहसा शिलां दृष्ट्वा महोदरः।
असम्भ्रान्तस्ततो बाणैर्निर्बिभेद दुरासदाम्॥ **6.97.13** ॥

रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्रधा।
निपपात तदा भूमौ गृध्रचक्रमिवाकुलम्॥ **6.97.14** ॥

तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्च्छितः।
सालमुत्पाट्य चिक्षेप तं स चिच्छेद नैकधा॥ **6.97.15** ॥

शरैश्च विददारैनं शूरः परबलार्दनः।
स ददर्श ततः क्रुद्धः परिघं पतितं भुवि॥ **6.97.16** ॥

आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन्।
परिघेणोग्रवेगेन जघानास्य हयोत्तमान्॥ **6.97.17** ॥

तस्माद्धतहयाद् वीरः सोऽवप्लुत्य महारथात्।
गदां जग्राह सङ्क्रुद्धो राक्षसोऽथ महोदरः॥ **6.97.18** ॥

गदापरिघहस्तौ तौ युधि वीरौ समीयतुः।
नर्दन्तौ गोवृषप्रख्यौ घनाविव सविद्युतौ॥ **6.97.19** ॥

ततः क्रुद्धो गदां तस्मै चिक्षेप रजनीचरः।
ज्वलन्तीं भास्कराभासां सुग्रीवाय महोदरः॥ **6.97.20** ॥

गदां तां सुमहाघोरामापतन्तीं महाबलः।
सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे॥ **6.97.21** ॥

आजघान गदां तस्य परिघेण हरीश्वरः।
पपात तरसा भिन्नः परिघस्तस्य भूतले॥ **6.97.22** ॥

ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात्।
आयसं मुसलं घोरं सर्वतो हेमभूषितम्॥ **6.97.23** ॥

स तमुद्यम्य चिक्षेप सोऽप्यस्य प्राक्षिपद् गदाम्।
भिन्नावन्योन्यमासाद्य पेततुस्तौ महीतले॥ **6.97.24** ॥

ततो भिन्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः।
तेजोबलसमाविष्टौ दीप्ताविव हुताशनौ॥ **6.97.25** ॥

जघ्नतुस्तौ तदान्योन्यं नदन्तौ च पुनः पुनः।
तलैश्चान्योन्यमासाद्य पेततुश्च महीतले॥ **6.97.26** ॥

उत्पेततुस्तदा तूर्णं जघ्नतुश्च परस्परम्।
भुजैश्चिक्षिपतुर्वीरावन्योन्यमपराजितौ॥ **6.97.27** ॥

जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परन्तपौ।
आजहार तदा खड्गमदूरपरिवर्तिनम्॥ **6.97.28** ॥

राक्षसश्चर्मणा सार्धं महावेगो महोदरः।
तथैव च महाखड्गं चर्मणा पतितं सह।
जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः ॥ **6.97.29** ॥

ततो रोषपरीताङ्गौ नदन्तावभ्यधावताम्।
उद्यतासी रणे हृष्टौ युधि शस्त्रविशारदौ ॥ **6.97.30** ॥

दक्षिणं मण्डलं चोभौ सुतूर्णं सम्परीयतुः।
अन्योन्यमभिसङ्क्रुद्धौ जये प्रणिहितावुभौ ॥ **6.97.31** ॥

स तु शूरो महावेगो वीर्यश्लाघी महोदरः।
महावर्मणि तं खड्गं पातयामास दुर्मतिः ॥ **6.97.32** ॥

लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुञ्जरः।
जहार सशिरस्त्राणं कुण्डलोपगतं शिरः ॥ **6.97.33** ॥

निकृत्तशिरसस्तस्य पतितस्य महीतले।
तद् बलं राक्षसेन्द्रस्य दृष्ट्वा तत्र न दृश्यते ॥ **6.97.34** ॥

हत्वा तं वानरैः सार्धं ननाद मुदितो हरिः।
चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः ॥ **6.97.35** ॥

विषण्णवदनाः सर्वे राक्षसा दीनचेतसः।
विद्रवन्ति ततः सर्वे भयवित्रस्तचेतसः ॥ **6.97.36** ॥

महोदरं तं विनिपात्य भूमौ
    महागिरेः कीर्णमिवैकदेशम्।
सूर्यात्मजस्तत्र रराज लक्ष्म्या
    सूर्यः स्वतेजोभिरिवाप्रधृष्यः ॥ **6.97.37** ॥

अथ विजयमवाप्य वानरेन्द्रः
    समरमुखे सुरसिद्धयक्षसङ्घैः।
अवनितलगतैश्च भूतसङ्घै -
    र्हरुषसमाकुलितैर्निरीक्ष्यमाणः॥ **6.97.38** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तनवतितमः सर्गः॥